## ११.४ विवक्षितान्यपरवाच्यध्वनेः पदवाक्यप्रकाशता

इदानीमेव भवान् अविवक्षितवाच्यध्वनेः उभयोः भेदयोः पदप्रकाशतां वाक्यप्रकाशतां च ज्ञातवान्। एवं भवान् अविवक्षितवाच्यध्वनेः अर्थात् लक्षणामूलध्वनेः अर्थान्तरसङ्क्रमितवाच्यम्, अत्यन्ततिरस्कृतवाच्यम् इत्युभयोः भेदयोः पदप्रकाशतावाक्यप्रकाशताभेदाभ्यां चतुर्ण्णां भेदानां विषये सोदाहरणं ज्ञातवान् । पूर्वपठितानाम् चतुर्णां भेदानां प्रकाशनं रेखाचित्रेण एवं कर्तुं शक्यते-

Scanned with CamScanner

अविवक्षितवाच्यध्वनिः
(लक्षणामूलध्वनिः)

- अत्यन्ततिरस्कृतवाच्यध्वनिः
  - पदप्रकाशता
    - १. स्निग्धाः समिधः श्रियः
    - २. कः सन्नद्धेविरह
    - ३. किमिव हि मधुरा
  - वाक्यप्रकाशता
    - १. या निशा सर्वभूताः
- अर्थान्तरसङ्क्रमितवाच्यध्वनिः
  - पदप्रकाशता
    - १. रामेण प्रियजी.
    - २. एवमेव जनस्तस्याः
  - वाक्यप्रकाशता
    - १. विषमयितः केषामपि यात्यमृतः

इदानीं भवान् ध्वनेः द्वितीयस्य भेदस्य विवक्षितान्यपरवाच्यस्य (अभिधामूलध्वनेः) पदप्रकाशतायाः वाक्यप्रकाशतायाः विषये च ज्ञास्यति। भवान् जानाति एव यद् विवक्षितान्यपरवाच्यस्य द्वौ भेदौ भवतः- असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्च। अस्मिन् एकादशे पाठे भवान् संलक्ष्यक्रमव्यङ्ग्यस्य ये त्रयो भेदाः शब्दशक्त्युत्थः अर्थशक्त्युत्थ उभयशक्त्युत्थश्च, एतेषामेव भेदानां पदप्रकाशतां वाक्यप्रकाशतां च ज्ञास्यति। असंलक्ष्यक्रमव्यङ्ग्यः रसादिरूपः एक एवास्ति। एतस्य भेदस्य पदवाक्यादिप्रकाशतायाः विषये अनन्तरं भवान् ज्ञास्यति। यत्र ध्वनौ वाच्यव्यङ्ग्ययोः क्रमः (बोधक्रमः) लक्ष्यते स संलक्ष्यक्रमव्यङ्ग्यध्वनिः भवति - संलक्ष्यते वाच्यव्यङ्ग्ययोः बोधक्रमः यस्मिन् ध्वनौ सः संलक्ष्यक्रमङ्ग्यः इति अर्थः क्रियते। इदानीं भवान् संलक्ष्यक्रमव्यङ्ग्यस्य यः प्रथमः भेदः शब्दशक्त्युत्थः, तस्य विषये पदप्रकाशतां वाक्यप्रकाशतां च ज्ञास्यति।

### ११.४.१ संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्त्युत्थस्य पदप्रकाशता

यत्र शब्दमहिम्ना एव विशेषार्थो व्यङ्ग्यार्थो व्यज्यते तत्र शब्दशक्त्युत्थः व्यङ्ग्यार्थः। तस्य व्यङ्ग्यार्थस्य चमत्कारातिशये ध्वनिः भवति। आनन्दवर्धनेन शब्दशक्त्युत्थस्य उदाहरणप्रसङ्गे 'प्रातुं धनैरि' ति पद्यं प्रस्तूयते। अस्मिन् पद्ये कस्यचिद् निर्धनस्य निर्वेदः ध्वन्यते, स च निर्वेदः शब्दशक्त्या ध्वन्यते। अतोऽत्र शब्दशक्त्युत्थः। किञ्च, पद्ये विद्यमानेन जडोऽहम् इति पदेन व्यज्यमानत्वात् तत्र पदप्रकाशता भवति।

कश्चिद् निर्धनः मनुष्यः स्वीयाम् वेदनां प्रकटयति। सः खलु निर्धनतायाः कारणाद् दुःखी जनानां याचकानां वा इच्छापूर्तौ असमर्थो भूत्वा निर्विण्णः सन् कथयति- यदि विधाता मां याचकजनानां कामनायाः परिपूर्त्यै योग्यं न कृतवान् तर्हि स्वच्छेन शीतलेन जलेन परिपूर्णं कूपं तडागमेव मां कथं न कृतवान्।

अत्र 'कूपोऽथवा किन्न जडः कृतोऽहम्' इत्यत्र कूपः पदम् अहम् पदञ्चेत्युभयम् प्रथमान्तम्। तथैव 'जडः इति पदमपि प्रथमान्तं विशेषणपदम्। नियमः अस्ति समानविभक्त्यन्तानां समानाधिकरणानां च पदानाम् अभेदसम्बन्धेन अन्वयो भवति। तथा हि- ''निपातातिरिक्तस्य नामार्थ इत्यस्य अभेदातिरिक्तसम्बन्धेनान्वयोऽव्युत्पन्नः।'' इति व्युत्पत्तिवादनामके ग्रन्थे लिखितम् अस्ति। अस्य सिद्धान्तस्य अनुसारेण समानविभक्तिकयोः विशेष्यविशेषणयोः अभेदेनान्वयो भवति। यथा 'नीलम् उत्पलम्'' इत्युक्ते नीलमपि विशेषणं प्रातिपदिकम् उत्पलमपि प्रातिपदिकम्। अतः उभे पदे परस्परम् अभेदेनान्वीय 'नीलाभिन्नमुत्पलम्', नीलगुणवदभिन्नमुलत्पलमिति वा बोधः क्रियते। तथैव अत्रापि 'जडः' इति प्रातिपदिकस्य अहम्' कूपः इत्याभ्यां प्रातिपदिकाभ्यां सहाभेदेन अन्वयो भवति। वक्ता स्व-दारिद्र्यवशाद् याचकानामिच्छापूर्तौ असमर्थः सन् कथयति। वक्ता 'अहम्' इत्यस्य विशेषणरूपेण 'जडः' इत्यस्य पदस्य (दुःखसुखादिभावसन्वेदनरहिते अर्थे) प्रयोगं कृतवान् आसीत्। परन्तु शब्दशक्त्या (अभिधामूलव्यञ्जनया) तद् विशेषणं जडपदम् कूपस्यापि

Scanned with CamScanner

विशेषणं भूत्वा अभेदसंसर्गेण शीतलजलयुक्तस्य, तृषितपथिकानां हितसाधकस्य परोपकारसमर्थस्य कूपस्य च व्यञ्जको भवति। अयं व्यङ्ग्यार्थः केवलं 'जडः' इति एकस्यैव पदस्य व्यञ्जकतायाः कारणादस्ति। अतोऽत्र शब्दशक्त्युत्थः पदप्रकाशता अस्ति।

---

मूलपाठः

'विवक्षिताभिधेयस्यानुरणनरूपव्यङ्ग्यस्य शब्दशक्त्युद्भवे प्रभेदे पदप्रकाशता यथा-

प्रातुं धनैरर्थिजनस्य वाञ्छां
दैवेन सृष्टो यदि नाम नास्मि।
पथि प्रसन्नाम्बुधरस्तडागः
कूपोऽथवा किन्न जडः कृतोऽहम्।।

अत्र हि 'जडः' इति पदं निर्विण्णेन वक्त्रात्मसमानाधिकरणतया प्रयुक्तमनुरणनरूपतया कूपसमानाधिकरणतां स्वशक्त्या प्रतिपद्यते।''

---

एवं कारिकाप्रथमार्धलक्षितान् अविवक्षितवाच्यध्वनेः चतुरो भेदान् उदाहृत्य द्वितीयकारिकार्धस्वीकृतान् विवक्षितान्यपरवाच्यध्वनेः अन्यान् षट्प्रकारान् क्रमेण उदाहरणप्रसङ्गे, प्रथमं शब्दशक्त्युत्थस्य पदप्रकाशतायामिदं पद्यमवतारयति।

प्राप्तुमिति। धनैः=द्रव्यादिभिः साधनैः, अत्र धनैरिति बहुवचनं यो येनार्थी तस्य तेनेति सूचनार्थम्। अर्थिजनस्य- याचकसमूहस्य, जनस्येति बाहुल्येन हि लोको धनार्थी, न तु गुणैरुपकारार्थीति व्यज्यते। वाञ्छाम्=कामनाम्। प्राप्तुम्=पूरयितुं यदि नाम दैवेन=विधात्रा न सृष्टः=न निर्मितः, नास्मि। तत् किमर्थं न धात्रा जडः=मन्दभाग्योऽहम्। पथि=मार्गे प्रसन्नाम्बुधरः=प्रसन्नम्=निर्मलम् लोकोपयोगि वा अम्बु=जलं धारयतीति प्रसन्नाम्बुधरः जडः=शीतलो निर्वेदसन्तापरहितः तथा च जडः शीतलजलयोगितया परोपकारसमर्थः, न कृतः=न विहितः। अत्र इन्द्रवज्रानामकं वृत्तम्। तल्लक्षणन्तु- स्यादिन्द्रवज्रा यदि तौ जगौ गः।''

अर्थात् यस्य पद्यस्य प्रत्येकं पादे क्रमेण तगणद्वयं जगणः ततः द्वौ वर्णौ गुरू भवतः तद् वृत्तम् इन्द्रवज्रा नाम।

अस्मिन् वृत्ते शब्दशक्त्युत्थां पदप्रकाशतां स्पष्टयितुं ग्रन्थकारः वृत्तौ लिखति- अत्र=पद्ये निर्विण्णेन वाक्त्रा 'जडः' इति पदम् 'अहम्' इत्यस्य समानाधिकारणतया लिखितम्। किन्तु अनुरणनरूपतया = संलक्ष्यक्रमव्यङ्ग्येन स्वशक्त्या=अभिधामूलव्यञ्जनया कूपसमानाधिकरणताम्- कूपस्यापि अभेदेन विशेषणतां प्रतिपद्यते=प्राप्नोति। अर्थात् 'जडः' इति पदस्य प्रयोगः वाक्त्रा 'अहम्' इत्यस्य अभेदविवक्षया समानाधिकरणेन कृतः, किन्तु संलक्ष्यक्रमव्यङ्ग्येन अभिधामूलशक्त्या कूपस्यापि विशेषणं प्रतिपद्यते इति भावः।

**बोधप्रश्नः**

१८. जडः पदं कथं कूप इत्यस्य विशेषणं जातम्।

१९. अनुरणनरूपतया प्रयुक्तमित्यस्य कोऽभिप्रायः।

२०. शब्दशक्त्युत्थ इत्यस्य कोऽर्थः।

## ११.४.२ संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्त्युत्थस्य वाक्यप्रकाशता

महाकविना बाणभट्टेन द्वौ गद्यग्रन्थौ लिखितौ- हर्षचरितम् कादम्बरी च।

Scanned with CamScanner

हर्षचरितम् आख्यायिका अस्ति, कादम्बरी च कथा अस्ति। अस्मिन् गद्यकाव्ये राज्ञो हर्षवर्धनस्य चरितं वर्णितम् अस्ति। कालक्रमेण हर्षवर्धनस्य पिता प्रभाकरवर्धनः, ज्येष्ठो भ्राता राज्यवर्धनश्च मृत्युमवाप्तः। हर्षवर्धनः उद्विग्नो भवति तदा तस्य सेनापतिः ''सिंहनादः'' हर्षवर्धनं प्रबोधयति। इदमेव वृत्तं महाकविना बाणभट्टेन विरचितस्य श्रीहर्षचरिताभिधस्य गद्यकाव्यस्य षष्ठे उच्छ्वासे वर्णितम्। तत्र सेनापतिः सिंहनादः कथयति- **''वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः''** इति। अस्य वाक्यार्थो भवति यद् अस्मिन् महाप्रलये अर्थात् पितुर्मरणरूपे भ्रातृमरण रूपे च प्रलयसदृशे महति दुःखे वृत्ते सम्प्राप्ते धरणीधारणाय राज्यस्य व्यवस्थायै अधुना साम्प्रतं त्वं हर्षवर्धनः एव शेषः अवशिष्टः असि इति। किन्तु अयं संलक्ष्यक्रमव्यङ्ग्येन अभिधामूलव्यञ्जनया सम्पूर्णादेव वाक्यात् ''महाप्रलये जाते यथा शेषनागः धरण्याः भारं धारयति तथा त्वमिति'' अर्थो व्यज्यते अतोऽत्र शब्दशक्त्युत्थवाक्यप्रकाशता विद्यते।

---

**मूलपाठः**

**तस्यैव वाक्यप्रकाशता यथा हर्षचरिते सिंहनादवाक्येषु- ''वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः।'' एतद्धि वाक्यमनुरणरूपमर्थान्तरं शब्दशक्त्या स्फुटमेव प्रकाशयति।**

---

**व्याख्या–** तस्यैव-विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्त्युत्थस्य वाक्यप्रकाशतायाः उदाहरणं हर्षचरिताख्ये बाणभट्टविरचिते गद्यकाव्यस्य षष्ठे उच्छ्वासे- सिंहनादवाक्येषु-सिंहनादनामकः सेनापतिः, तस्य वाक्येषु अवलोकयितुं- शक्यते इति भावः। किं तद्वाक्यमिति- वृत्तेऽस्मिन् भ्रातापित्रोः मरणरूपे महाघोरे, महाप्रलये-महस्य उत्सवस्य आसमन्तात् प्रलयो यत्र तादृशि शोककारणभूते वृत्ते जाते धरणीधारणाय-धरण्याः पृथिव्याः प्रजानां वा धारणाय-रक्षणाय, व्यवस्थाकरणाय त्वम्-भवान् हर्षवर्धनः एव शेषः-अवशिष्टः। अथ च इयता वाक्ये पूर्णेऽपि वाक्यार्थे शब्दशक्त्या कल्पावसाने भूपीठभारोद्वहनक्षमः एको नागराजः, एवं दिग्दन्ति-प्रभृतिष्वपि-पलीनेषु इति अर्थान्तरं द्योत्यते।

**बोधप्रश्नः**

२१. इदं वाक्यं कुतः समुद्धृतं, तस्य लेखकः कः?

२२. शेष इति पदेन कथं वाक्यप्रकाशता?

### ११.४.३ संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्त्युत्थकविप्रौढोक्तिसिद्धस्य पदप्रकाशता

एवं शब्दशक्त्युत्थस्य प्रथमभेदस्य पदप्रकाशतायाः वाक्यप्रकाशतायाश्च उदाहरणं प्रस्तूय इदानीम् अर्थशक्त्युत्थस्य उदाहरणानि प्रस्तोतुम् उपक्रमते। अर्थशक्त्युत्थध्वनेः त्रयो भेदाः भवन्ति।

१. स्वतःसम्भवी

२. कविप्रौढोक्तिसिद्धः

३. कविनिबद्धवक्तृप्रौढोक्तिसिद्धः।

अत्र इदमपि भवान् पठितवान् यद् भेदपरिगणनायाः प्रसङ्गे आनन्दवर्धनः स्वतःसम्भविनं कविप्रौढोक्तिसिद्धमिति भेदद्वयमेव शब्दतः प्रतिपादितवान्। केवलं वृत्तौ कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य चर्चा अस्ति। तथैव अत्र उदाहरणप्रसङ्गेऽपि केवलं कविप्रौढोक्ति-सिद्धस्य पदप्रकाशतां वाक्यप्रकाशताम् उदाहृतवान् अस्ति। कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य

Scanned with CamScanner

कविप्रौढोक्तिसिद्धे एव गतार्थतां करोति। एवं कविप्रौढोक्तिसिद्धस्य पदवाक्यप्रकाशताम् उदाहृत्य स्वतः सम्भविनः पदप्रकाशतां वाक्यप्रकाशतां च उदाहरिष्यति।

अत्र कविप्रौढोक्तिसिद्धस्य पदप्रकाशतायाः यदुदाहरणं दत्तवान्। तस्योदाहरणस्य अयम् अभिप्रायः–

अस्मिन् पद्ये वसन्तवर्णनमस्ति। कविः कथयति यद् आम्रमञ्जरीभिः विभूषितं, वसन्तोत्सवस्यानन्देन अतीव मनोहरम् कामदेवस्य आमोदेन परिलसितं वसन्तलक्ष्याः मुखं तथा असमर्पितम् अपि कामदेवेन बलाद् गृहीतम्।

वस्तुतः लोके नवोढा नायिका नायकाय अङ्गदाने अतिशयं सङ्कोचं करोति। तथापि नायकः बलात्कारपूर्वकं तस्याननं चुम्बति आलिङ्गनं च करोति। अत्र वसन्तऋतुः समागतः, कामः तां ऋतुं सर्वतोभावेन समालिलिङ्ग इति वाच्यार्थः। परमत्र कविप्रौढोक्तिसिद्धवस्तुना अर्थशक्त्या व्यञ्जनया नायकनायिकयोः नूतनसमागमरूपस्य वस्तुनः प्रकाशनं भवति। अतोऽत्र कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुव्यङ्ग्यस्य अर्थशक्त्युत्थध्वनेः उदाहरणम् अस्ति। अथ च असमर्पितमपीत्यनेन पदेन प्रकाशितत्वात् पदप्रकाशतायाउदाहरणम्।

---

मूलपाठः

---

**''अस्यैव कविप्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थशक्त्युत्थप्रभेदे पदप्रकाशता यथा–**

**चूताङ्कुरावतसं क्षणप्रसरमहार्घमनोहरसुरामोदम्।**
**असमर्पितमपि गृहीतं कुसुमशरेण मधुमासलक्ष्मीमुखम्।।**

**अत्र ह्यसमर्पितमपि कुसुमशरेण मधुमासलक्ष्म्या मुखं गृहीतमित्यसमर्पितमपीत्येतदवस्थाभिधायि पदमर्थशक्त्या कुसुमशरस्य बलात्कारं प्रकाशयति।**

---

अस्य पाठस्य अर्थं ज्ञातुं व्याख्या लिख्यते। अस्यैव=विवक्षितान्यपरवाच्यस्य अर्थशक्त्युत्थध्वनौ कविप्रौढोक्तिमात्रनिष्पन्नशरीरे भेदे, पदप्रकाशतायाः उदाहरणे महाकविना प्रवरसेनेन विरचितस्य प्राकृतनाट्यस्य हरविजयमित्यस्य एकाम् आर्यां प्रस्तौति ग्रन्थकारः। आर्यायाः लक्षणं प्रागेव भवतः बोधार्थं प्रदत्तम्। अतोऽत्रापि भवान् तदनुसारेण आचरतु।

चूताङ्कुरावतसं क्षणप्रसरमहार्घमनोहरसुरामोदम् मधुमासलक्ष्मीमुखम् असमर्पितमपि कुसुमशरेण गृहीतम् इति अन्वयः।

चूताङ्कुरावतंसम्–चूताङ्कुरस्य=आम्रमञ्जर्याः अवतंसः कर्णालङ्कारो यत्र तम्। क्षणः उत्सवः, तस्य प्रसरे विस्तारे। महार्घमनोहरसुरामोदम्=महार्घेण उत्सवप्रसरेण मनोहरसुरस्य कामदेवस्य आमोदः चमत्कारो यत्र तत्। अत्र महार्घशब्दस्य परनिपातः, प्राकृते नियमाभावात्। मधुमासस्य= एतद् ऋतोः लक्ष्मीं शोभाम् अथवा मधुमास एव लक्ष्मीः तस्या मुखम् प्रारम्भः, कुसुमशरेण= कामेन गृहीतम्।

अस्मिन् पद्ये असमर्पितमपि मधुमासलक्ष्म्याः आननं कामेन बलाद् गृहीतम् इति बलात्कारं प्रकाशयति। एवमत्र कविप्रौढोक्त्या अर्थान्तरस्य व्यञ्जकत्वात् प्रौढोक्तिसिद्धस्य पदप्रकाशता।

विषयेऽस्मिन् पूर्वमेव पठितं भवता यद् मूल ग्रन्थे ग्रन्थकारः कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य उदाहरणं न दत्तवान्। तथा च अर्थशक्त्युत्थध्वनेः भेदनिरूपणे अपि कविनिबद्धप्रौढोक्तिसिद्धं भेदं शब्दतः नोक्तवान्। किन्तु वृत्तौ यथा कथञ्चिद् कविनिबद्धप्रौढोक्तिसिद्धं भेदं स्वीकरोति। अतः भवतः प्रबोधाय तस्यापि भेदस्य पदप्रकाशताया उदाहरणं दीयते। तथाहि–

Scanned with CamScanner

सत्यं मनोरमा रामाः सत्यं रम्याः विभूतयः।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्।।

इत्यत्र कविना यो विरागी वक्ता निबद्धः तस्य प्रौढोक्त्या जीवितशब्दः अर्थशक्तेः आधारेण इदं ध्वनति यत् सर्वे एव अमी कामाः विभूतयश्च स्वजीवितमात्रोपयोगिनः तद् अभावे हि सद्भिरपि तैः असद्रूपता आप्यते। तदेव च जीवितं प्राणधारणरूपत्वात् प्राणवृत्तेश्च चाञ्चल्यादनास्था पदमिति विषयेषु वराकेषु किं दोषोद्घोषणदौर्जन्येन निजमेव जीवितमुपालभ्यम्। तदपि च निसर्ग–चञ्चलमिति न सापराधमित्येतावता गाढं वैराग्यमिति। एवमत्र 'मत्ताङ्गनायाः अपाङ्गभङ्गलोलं हि जीवितम्' इत्यत्र भङ्गलोलं पदेन अर्थशक्त्या गाढं वैराग्यं व्यज्यते इति कविनिबद्धवक्तृप्रौढोक्तिपदप्रकाशतायाः उदाहरणम्।

**बोधप्रश्नः**

२३. चूताङ्कुरावतंसमित्यत्र कथं पदप्रकाशता?

२४. कविप्रौढोक्तिसिद्धः अर्थशक्त्युत्थः कथम्?

२५. अस्मिन् पद्ये किं छन्दः?

Scanned with CamScanner